Roll No. : ......................................

Total No. of Questions : **12** ] [ Total No. of Printed Pages : **4**

# AFMA–134

## M.A. (Final) Examination, 2023

## SANSKRIT

Paper - VI **(क)**

## (शास्त्रीय साहित्य एवं काव्य)

*Time : 3 Hours* ] [ *Maximum Marks : 100*

**खण्ड–अ** **(अंक : 2 × 10 = 20)**

**नोट** :– सभी **दस** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **50** शब्द)। प्रत्येक प्रश्न **2** अंक का है।

**खण्ड–ब** **(अंक : 8 × 5 = 40)**

**नोट** :– सात में से किन्हीं **पाँच** प्रश्नों के उत्तर दीजिए। (उत्तर-सीमा **200** शब्द)। प्रत्येक प्रश्न **8** अंक का है।

**खण्ड–स** **(अंक : 20 × 2 = 40)**

**नोट** :– चार में से किन्हीं **दो** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **500** शब्द)। प्रत्येक प्रश्न **20** अंक का है।

**खण्ड–अ**

1. समस्त दश प्रश्नानामुत्तरं ददातु। कयोश्चित् द्वयोः उत्तरं संस्कृत-भाषायां लिखतु।

   (i) कुन्तकसम्मतं काव्यस्य मार्गान् लिखतु।

   (ii) का प्रबन्ध-वक्रता ?

   (iii) काव्यमीमांसायाः द्वितीयोऽध्यायस्य किं नामास्ति ?

(iv) ओङ्कारश्चाऽथशब्दश्च द्वावेतौ कं भित्वा विनिर्यातौ ?

(v) अर्थशास्त्रस्यानुसारेण का वेदत्रयी ?

(vi) अर्थशास्त्रमनुसृव्य दण्डनीति लिखतु।

(vii) हर्षचरिते कुरङ्गकः कः ?

(viii) कः रसायनः किं च सः अकरोत् ?

(ix) महाश्वेतायाः नायकस्य किं नामास्ति ?

(x) महाश्वेतायाः पितरौ नामे लिखतु।

## खण्ड–ब

**नोट** :– केषाञ्चित् पञ्चप्रश्नानामुत्तरं ददातु। प्रश्न संख्या 4, 5 अनिवार्याः।

2. प्रस्तुत कारिकायाः सप्रसंग व्याख्या कुर्यात्–

अलङ्कृतिरलङ्कार्यमपोद्धृव्य विवेच्यते।

तदुपायतया तत्त्वं सालङ्कारस्य काव्यता॥

3. सप्रसंग व्याख्या करणीया–

वाच्यवाचक सौभाग्यलावण्यपरिपोषकः।

व्यापारशाली वाक्यस्य विन्यासो बन्ध उच्यते॥

4. संस्कृत माध्यमेन सप्रसंग व्याख्या कुर्यात्–

द्विविधं शिष्यमाचक्षते तदुत बुद्धिमानाहार्यबुद्धिश्च। यस्य निसर्गतः शास्त्रमनुधावति बुद्धिः स बुद्धिमान्। यस्य च शास्त्राभ्यासः संस्कुरुते बुद्धिमसावाहार्यबुद्धिः। त्रिधा च सा, स्मृतिर्मतिः प्रज्ञेति। अतिक्रान्तस्यार्थस्य स्मर्त्री स्मृतिः। वर्त्तमानस्य मन्त्री मतिः। अनागतस्य प्रज्ञात्री प्रज्ञेति। सा त्रिप्रकाराऽपि कवीनामुपकर्त्री। तयोर्बुद्धिमान् शुश्रूषते, शृणोति, गृह्णीते, धारयति, विजानात्यूहतेऽपोहति तत्त्वं चाभिनिविशते। आहार्यबुद्धेरप्येत एव गुणाः किन्तु प्रशास्तारमपेक्षते। अहरहः सगुरूपासना तयोः प्रकृष्टो गुणः।

5. संस्कृते सप्रसंग व्याख्या विधेया—

गृहस्थस्य स्वकर्माजीवस्तुल्यैरसमानर्षिभिवैवाह्यमृतुगामित्वं देवपित्रतिथिभृत्येषु त्यागः शेषभोजनं च। ब्रह्मचारिणः स्वाध्यायोऽग्निकार्याभिषेकौ भैक्षव्रतत्वमाचार्ये प्राणान्तिकी वृत्तिस्तदभावे गुरुपुत्रे सब्रह्मचारिणिवा। वानप्रस्थस्य ब्रह्मचर्यं भूमौ शय्या जटाजिनधारणमग्निहोत्राभिषेकौ देवतापित्रतिथिपूजा वन्यश्चाहारः।

परिव्राजकस्य संयतेन्द्रियत्वमनारम्भो निष्किंचनत्वं सङ्गत्यागो भैक्षमनेकत्रारण्ये वासो बाह्यमाभ्यन्तरं च शौचम्।

6. सप्रसंग व्याख्या करोतु—

अथ दूरादेव लेखगर्भया नीलीरागमेचक रुचा चीरचीरिकया रचितमुण्डमालकम्, श्रमातपाभ्यामारोप्यमाण कायकालिमानम्, अन्तर्गतेन शोकशिखिनाऽङ्गारतामिव नीयमानम् अतित्वरागमनद्रुततरपदोद्धुय-मानधूलिराजिव्याजेन राजवार्त्ता श्रवणकुतूहलिन्या मेदिन्येवानुगम्यमानम्, अभिमुखपवनप्रेङ्खत्प्रविततोत्तरीयपटप्रान्त वीज्यमानोभयपार्श्वमतित्वरया कृतपक्षमिवाशु परापतन्तम्, प्रेर्यमाणमिव पृष्ठतः स्वाभ्यादेशेनाकृष्यमाणमिव पुरस्तादायतैः श्रमश्वासमोक्षैः स्विद्यल्ल लाटतट घटमान प्रतिबिम्बकेन कार्यकौतुकादपह्रियमाणलेखमिव भास्वता संभ्रमभ्रष्टै रिवेन्द्रियैः शून्यीकृतशरीरम् कुरङ्गक नामानमायान्तमद्राक्षीत्।

7. अत्रैव चान्तरे भवनकमलिनीपालः कोकमाश्वासयन्नपरवक्त्रमुच्चैरपठत्—

विहग ! कुरु दृढ़ं मनः स्वयं त्यज शुचमास्व विवेकवर्त्मनि सह कमलसरोजिनीश्रिया श्रयति सुमेरुशिरो विरोचनः॥

8. सप्रसंग व्याख्या विधेया—

अथ गीतावसाने मूकीभूतवीणा प्रशान्तमधुकररुतेव कुमुदिनी सा कन्यका समुत्थाय प्रदक्षिणीकृत्य कृतहर-प्रणामा परिवृत्य स्वभाव धवलतया तपःप्रभावप्रगल्भया दृष्ट्या समाश्वासयन्तीव, पुण्यैरिव स्पृशन्ती, तीर्थजलैरिव प्रक्षालयन्ती, तपोभिरिव पावयन्ती, शुद्धिमिव कुर्वाणा, वरदानम् इवोपपादयन्ती, पवित्रतामिव नयन्ती, चन्द्रापीडभावभाषे-स्वागतमतिथये, कथमिमां भूमिमनुप्राप्तो महाभागः तदुत्तिष्ठ, आगम्यताम्, अनुभूयतामतिथिसत्कारः इति।

## खण्ड–स

**नोट** :– **द्वयोः** प्रश्नयोः उत्तरं ददातु।

9. ''सा च द्विधा कारयित्री भावयित्री च'' इति स्पष्ट करणीयम्।

10. अर्थशास्त्रमनुसृत्य 'कथं राजपुत्ररक्षणम्' इति विवेचना कुरु।

11. गद्य कवीनां निकषं वदन्ति इति व्याख्या करणीया।

12. महाश्वेतावृत्तान्तस्य कथा लेखनीया।